M-469

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 469 विषय पूजाविधी.
नांव मोटनाविधी. MSS
लेखक/लिपीकार —
पृष्ठ १
काळ — पूर्ण/~~अपूर्ण~~

श्रीगजाननप्रसन्नवरद ॥ ॥ अथमोदनं ॥ तत्रमेरुतंत्रे ॥ अथमोदनकंवक्ष्येदेवाविर्भावकार
णं ॥ पाकक्रियाप्रकर्तव्या चतुर्भक्ष्यसमन्विता ॥ भार्यया साधकेंद्रस्य पातिव्रत्यादियुक्त
या ॥ अथप्रसूताः स्त्रियः पंच आहूय सकुमारिकाः ॥ अलंकृताः प्रविश्यास्ताएकपंक्तयोपवे
शयेत् ॥ तत्रादौ विघ्नपस्थाने मन्त्रेनबटुकस्य च ॥ ताः संपूज्य महत्पात्रंपविश्यं तत्र चार्प
येत् ॥ क्रमाद्विगुणमानेनमध्वाज्ये च सितादधि ॥ दुग्धं च निक्षिपेत्तत्रनैवेद्यंतत्र नि
क्षिपेत् ॥ कुमारिकायाहस्तेनमंथयेयुस्त्रियश्च तत् ॥ स्त्रीभिस्तस्मिन्मथ्यमानेदेवावेशः
प्रजायते ॥ देवावेशोजायमाने सुगंधोवातिमारुतः ॥ सर्वंमनोगतंवक्तिदेवताशुप्रसीद
ति ॥ सिध्यंतिसर्वकार्याणिमोदनानांशतेन च ॥ नस्वैर्भवेद्विवादस्तुपंचाशद्भिः सुतस्तथा ॥
अशीत्यागतराज्यानिर्विंशत्या लभते धनं ॥ अष्टोत्तरशतेनापि असाध्येनापि मेलयेत् ॥

मारनं ॥

गजानन ॥१॥

कौमारिकाचेष्टदेवंकौमार्यौईरितोविधि ॥ बटुकस्य चेत्यत्र चकारः कुलदेवतायाः सिताशर्करादेवा
वेशः देवाविर्भावः न खेविंशैर्मोर्टनै अष्टोत्तरशते न अष्टोत्तरशतसंख्येर्मोर्टनैः असाध्ये नापिं
कार्येणापिमेलयेत् ॥ असाध्यमपिकार्यं अष्टोत्तर संख्य मोरनैः सिध्यंतीत्यर्थः ॥ कौमारीका
चेष्टदेवंउद्दिश्योत्तमपातिला भार्थंइमंविधिंकुर्यादित्यर्थः ॥ कौमारिकाचेष्टदेवंउद्दिश्य अष्टोत्त
रशतसंख्यमोरनानिकुर्यात् ॥ एवंकृते असाध्येनापिवरेणमेलयेत् ॥ असाध्यमपिवरं प्राप्नुया
त् इतिवार्थः ॥ अयंविधिकौमार्याएवईशिताकथितः कुमारिकांविनाविधिर्नभवतीत्यर्थः ॥ कौ
मारीयोगेश्वरी तद्दैश्येकृएवायंविधिरिवार्थः ॥ इतिद्रष्टव्यं ॥ लोकेतु अयंबोडनाविधिः समा
प्तः ॥ ॥ छ ॥ गजाननवरद ॥ ॥ छ

॥१॥